आ०र्क यन॥ सप्ताहं प्रातस्नायी संध्याहीनस्त्रिभिर्दिनैः॥ द्वादशाहमनग्निः स्याद्द्विजः शूद्रत्वमाप्नुयात्॥ तद्दोषपरिहारार्थं भानुवारेपिवास्यदे॥
१० भानुवारे लवस्यं प्रातः स्नानं कार्यमित्यर्थः॥ स्नानकालमाह सएव॥ अरुणकिरणग्रस्तां प्राचीं दिशमवलोक्य स्नायादिति॥ स्नानं नद्या-
दिषु कार्यमित्याह हेमाद्रौ मनुः॥ नदीषु देवखातेषु तडागेषु सरःसु च॥ स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च॥ छंदोगपरिशिष्टे ॥ धनुः सह-
स्राण्यष्टौ च गतिर्यासां न विद्यते॥ न ता नदीशब्दवहा गर्तास्ते परिकीर्तिताः॥ धनुर्हस्तचतुष्टयं वितस्तान्॥ एकतः सर्वतीर्थानि जाह्नव्येकैव चा-
न्यतः॥ ब्रह्मलोकेपि शिरसः पतितायां महीतलं॥ मरीचिः॥ भूमिष्ठमुद्धृतं वापि शीतमुष्णमथापि वा॥ गांगं पयः पुनात्येव पापमामरणांतु-
तमिति॥ अथ स्नानविधिः॥ प्रयोगपारिजाते॥ नमाल मृत्तिकास्नानं न कुर्याद्धोमपर्वनिशि॥ प्रातः स्नानं सदा कुर्याद्गोमयेन विचक्षणः॥ मध्यं
दिने मृदा स्नानं सायं कार्यं जलेनवै॥ मनुः॥ खसंस्थं गोमयं ग्राह्यं भूमौ निपतितेपि वा॥ उपर्यधश्च संत्याज्यं संपाद्यं मध्यमं हि यत्॥ नाभिमात्रे ज-
ले गत्वाभिः कुर्यान्मज्जनं ततः॥ गात्राणां क्षालनं कृत्वा सम्यक्स्नायात्ततः परं॥ सम्यग्गोमयादिविधिनेत्यर्थः॥ आदाय गोमयं विप्रो वाम-
पाणौ निधाय च॥ व्यस्तत्वात त्रिधा कृत्वा निक्षिपेत्प्रणवेन तु॥ दक्षिणास्थितभागेन रक्षोहानाय दिक्षु च॥ तीर्थे प्रक्षिपेद्भागमुत्तरं तत-
मभितं॥ मानस्तोकेति मंत्रेण मध्यं चैवाभिमंत्रयेत्॥ मूर्धादिपादपर्यंतं हस्ताभ्यां सुसमाहितः॥ गंधद्वारामित्यनया सर्वांगमनुलेपयेत् १०
॥ प्रार्थनादिमंत्रांस्तु प्रयोगे वक्ष्यामः॥ पुराणे॥ ततः शिरस्त्वपुरतः कृत्वा मज्जेन्नदीमुखः॥ विष्णुः॥ स्रोतसोभिमुखः स्नायान्नदीषु-

ह्यपतयेदेवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातु भेषजंशन्नो अस्तुद्विपदेशंचतु ष्पदे ॥ नमोब्रह्मणेप्रजापतयेविश्वेदेवाजगती ॥ उपस्था-
नेवि॰ ॐ नमोब्रह्मणेनमो अस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ नमः प्राच्यैदिशेयाश्चदेवताः
एतस्यांप्रतिवसंतिताभ्यश्चनमः नमोदक्षिणस्यैदिशेयाश्च॰ नमः प्रतीच्यैदिशेया॰ नमोउदीच्यैदिशेया॰नमऊर्ध्वायैदिशेया॰ नमोधरायैदिशेया
श्च॰ नमोवांतरायैदिशेया॰ ॥ संध्यायैनमः ॥गायत्र्यैनमः ॥ सावित्र्यैनमः ॥ सरस्वत्यैनमः ॥सर्वाभ्योदेवताभ्योनमोनमः ॥ कामोकार्षीन्मन्युर
कार्षीन्नमोनमः ॥उत्तमेशिखरेजातेभूम्यांप र्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं भद्रन्नोअपिवातयमनः ॐ शांतिप्रतिभि
रन्त्वा प्रदक्षिणंपरिक्रामन्नासत्यलोकात्पातालादालोकालोकपर्वतात् येसंतिब्राह्मणादेवास्तेभ्योनित्यंनमोनमइतिगुरूनभिवादयेत् ॥ स्वस्ति
कारेहस्ताभ्यांकर्णौस्पृष्ट्वा ॥ आंगिरसबार्हस्पत्यभारद्वाजेतित्रिप्रवरान्वितभारद्वाजगोत्रोत्पन्नोहंश्रीधरशर्मा भोगुरोत्वामभिवादयामि
इतिस्वस्वप्रवरानुच्चार्याभिवाद्यद्विराचमनंकुर्यादिति ॥ अथौपासनंदक्षः ॥ संध्याकर्मावसानेतुस्वयंहोमोविधीयते ॥स्वयंहोमेफलंयस्यात्तदन्येन
नलभ्यते अशक्तंप्रत्याह ॥ सएव ॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः ॥एतैरपिहुतंयत्स्यात्तत्स्वयंहुतमेवतु ॥ पत्नीकन्यात्तथाहुत्या
द्विनापर्युक्षणक्रियामिति ॥विट्पतिर्जामाता ॥ आश्वलायनः ॥ स्वयंपत्न्यपिवापुत्रःकुमार्यंतेवासीवेति अत्र ऋत्विगादिनाभासमक्षंतुदंपत्यो
र्होतव्यंनार्विसमारिनाहुणोरप्यसमक्षंप्रमैकहुतमनर्थकं सन्निधौयजमानः स्याद्दूरस्थागकारकः ॥ असंनिधौतुपत्नीस्याद्दूरत्यागकारिका

समर्थस्तदाइदंतत्कंपरऊतएकमितिवकूचमंत्रेणायतनैप्रक्षिप्य ॥ व्यस्तसमस्तव्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात् ॥ जीवना-
समर्थः ॥ स्फुलिंगस्य स्तदानदोषइतिभावः ॥ शम्यादेशादपिबहिरुपसीयगतेग्नौपथिकृतेग्नयेचरुः कार्योथवा अग्नयेपथिकृते
स्वाहेतिपूर्णाहुतिः कार्या ॥ तदुक्तंकारिकायां ॥ अर्वाक्शम्यापरासात्तुबहिरायतनाद्गतःप्रायश्चित्तसमाप्तंतंसमर्थोजीवितुंयदि ॥
इदंतइत्यृचातस्यस्थानेग्निंप्रक्षिपेत्पुनः ॥ आज्याहुतीश्चजुहुयाद्व्यस्तस्तारव्येश्चपूर्ववत् अतिक्रांतेयदाशम्यापरासमनलोभवेत् ॥
चरुः पथिकृतेकार्यः पूर्णाहुतिरथापिवा ॥ पूर्णाहुतिलक्षणंतत्रैव ॥ आज्यंद्वादशकृत्वस्तु गृहीत्वापूरयेत्स्रुचं ॥ तयाचाज्याहुतिः
कार्यासापूर्णाहुति रिष्यते ॥ स्रुवपूर्णाहुतिर्वास्यादित्येकेयाज्ञिकाविदुरिति ॥ आपतनाम्नहद्त्रिंशदंगुलात्मकोदेशः शम्या ॥ शम्याष
ड्त्रिंशदंगुलेत्यापस्तंबस्मरणात् ॥ आपतनभंगेनस्थलसंकोचादिनावास्थलांतरेग्निनयनप्रसक्तौप्रकारउक्तःस्मिकांडमंडने ॥ प्रत्य-
क्षेणानयनमग्निंस्रुक्स्रुवेसेचेतुंनस्यातियदिवाग्नेस्रुचि स्थालिनिधायोल्मुकस्यतंपुनः हरेदनुस्रुसन्नेवंनस्येदग्निर्हरणेनलः शकरेनातिदूरंवाहरे
द्देशांयथारुचि ॥ स्वांगेनवाथवाशम्यापरासोध्याहृत्येत्स्रुसन् ॥ कर्मार्थनयनेग्नीनां नानुग्नासादिचोद्यते ॥ नदीसंतरणेग्नीनांसी-
मातिक्रमणेतथा ॥ सर्वत्रायतनसीम्नोर्वास्वामिस्पृष्टस्त्वरण्यः प्रत्यक्षमराणिहारं नान्यथाग्निविनाशनमिति ॥ अन्यान्यपि
प्रायश्चित्तानिविस्तारभीत्येहन प्रदर्शितानीतिसंक्षेपः ॥ अथोपवसथ्येवर्ज्याण्याहजाबालिः ॥ कोविदारान्कुलित्थांश्च

येह्नोक्तानितान्याचारमयूखादिग्रंथेभ्योवगंतव्यानि ॥ तत्रापूर्वाभावेपर्युषितान्यपिग्राह्याणीत्युक्तंस्मृत्यंतरे ॥ पंकजंपंचरात्रंस्याद्दशरा-
त्रंचबिल्वकं ॥ तुलस्येकादशाहात्तुपुनः प्रक्षाल्यपूजयेत् ॥ स्कांदे ॥ गंगाजलंत्र्यहाद्ध्यात्वंपूजनेभक्तिसंयुतः ॥ भविष्ये ॥ नाक्षतैरर्चये
द्विष्णुंनतुलस्यागणेश्वरं ॥ दूर्वाभिर्नार्चयेद्दुर्गांकेतकैर्नमहेश्वरं ॥ अक्षतानिषेधस्तुशालग्रामपरः शालग्रामशिलायेवनाक्षतैरर्चयेद्धि-
जइतिविष्णूक्तेः ॥ उक्तंचवार्तिके ॥ सामान्यविधिरस्पष्टः संह्रियेतविशेषतइति ॥ नांशुकैर्मर्दयेद्देवंनाधःपुष्पैः समर्चयेत् ॥ कुशाग्रैर्न
क्षिपेत्तोयंवज्रपातसमंभवेत् ॥ नशुष्कैः पूजयेद्देवंकुसुमैर्नमहीगतैः ॥ नविशीर्णदलैः शिष्टैर्नाशुभैर्नाविकाशिनैः ॥ पूतिगंधीन्युग्रगं
धीनि अल्पगंधीनिवर्जयेत् ॥ वामने ॥ हिरुकाकंकणंदारुमल्लिकागुरुवासिता ॥ शास्त्रंजातीफलंश्रीमत्प्रियाधूपाहरेःप्रिये ॥ हिरु-
कामांसी ॥ कंकणंगुग्गुलः शास्त्रोनखं ॥ घृततैलैर्विनाकिंचिद्दीपार्थेनसमाहरेत् ॥ पाद्मे ॥ नैवेद्यपात्रंवक्ष्यामिकेशवायमहात्मने ॥ हैरण्यं
राजतंकांस्यंताम्रंमृन्मयमेवच ॥ पालाशंपद्मपत्रंवापात्रंविष्णोरतिप्रियं ॥ हविः शाल्योदनंदिव्यमाज्ययुक्तंसशर्करं ॥ नैवेद्यंदेवदेवा-
ययावकंपायसंतथा ॥ नैवेद्यवस्त्वलाभेतुफलानिविनिवेदयेत् ॥ फलानामप्यलाभेतुतोयान्यपिनिवेदयेत् ॥ मरीचिः ॥ विधायदेवतापूजांप्रात
र्होमादनंतरं ॥ गुरूक्तेनतुमार्गेणमूलमंत्रंजपेद्बुधइति ॥ भविष्ये ॥ समभ्यर्च्यपिबेद्देवान्यः पादसलिलंहरेः सयातिपरमंस्थानंतद्विष्णोःप २७
रमंपदं ॥ विष्णुपादाभिषिक्तंयः पात्रेणैवपिबेज्जलं ॥ सर्वपापविनिर्मुक्तः सयातिपरमांगतिं ॥ यः पादसलिलंविष्णोः करेणपिबतेन-

ब्राह्मणमात्रं भोजयेत् तदशक्तावपि किंचिदन्नमुद्धृत्य तदन्नं पित्र्यः स्थानमेव कृत्वा ब्राह्मणाय दद्यात् एतच्च नित्यं नित्यश्राद्धाकरणे त्वर्चनं इतिदशाथाजपो इति तत्र विधाने प्रायश्चित्त श्रवणात् अथ भोजनविधिः आश्वलायनस्मृतौ अर्कपर्वद्वये रात्रौ चतुर्दश्य ष्टमी दिवा एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति व्यासः पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता हस्तौ पादौ मुखं प्रक्षाल्यान्ये त्वर्थः आश्वमेधिके आर्द्रपादस्तु भुंजीयात् प्राङ्मुख आसने शुचौ पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनरिति आसमेव वर्ज्यानि भविष्ये ता गोभ्रुरुणमयं भिन्नं तथा पालाशपिप्पलं लोहं बस्तं सदैवार्कं वर्जयेदासनं बुधः ब्रह्मपुराणे उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते चतुरस्रं त्रिकोणं च वर्तुलं चार्धचंद्रकं कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं हेमाद्रौ वह्निः पंचाशत्पलिकं कांस्यं त्वधिकं भोजनाय वै गृहस्थैस्तु सदा कार्यं मभावे रौप्यहेममयो ः कश्चिन्निषेधमाह स्मृतिचंद्रिकायां भविष्ये ता तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् इति अत्र दिङ्नियमः कौर्मे प्राङ्मुखोऽन्नानि भुंजीतेति आयुष्यं प्राङ्मुखो भुंक्ते यशस्वी दक्षिणामुखः धनवान्पश्चिमायां तु धर्मवानुत्तरामुखः पुत्रवांस्तूत्तरामुखो नाश्नीयात् मनुः पुत्रवांस्तु गृहे नित्यं नाश्नीयादुत्तरामुखः सोमवारे तथाभ्यंगं वर्जयेत्तु सदा बुधः इति निषेधात् अत्राभ्यंगपदात्सर्षपादितैलाभ्यंग एव निषिद्धो न तु तिलतैलाभ्यंगः तैलाभ्यंगनिषेधे तु तिलतैलं निषिध्यते अभ्यंगस्य निषेधे तु सार्षपादिर्निषिध्यते-

स्वादोपितोमयोरपितोइत्यभिमंत्र्य सत्यंत्वर्तेन परिषिंचामीति दिवापरिषिंचेदृतंत्वासत्येनपरिषिंचामीतिरात्रौदक्षिणतोभूपतयेभुवनपतये
भूतानांपतयइति नमोन्तैः पात्रस्थंभूस्थंवाबलिंविकीर्य समाहितोमृतोपस्तरणमसीत्यपः प्राश्य सव्येनपाणिनापात्रमालभ्य तर्ज
नीमध्यमांगुष्ठैः प्राणायमध्यमानामिकांगुष्ठै रपानायानामिकाकनिष्ठांगुष्ठैर्व्यानायकनिष्ठतर्जन्यंगुष्ठैरुदानायसर्वांगुलिभिःसमानाय
स्वाहेति जुहुयात्सर्वाभिरेववासर्वेभ्योजुहुयादेवंवाग्यतोभुक्त्वामृतापिधानमसीत्यपिधानं प्राश्य शोधितमुखपादपाणिर्द्विराचमेदेवं
भुंजानोग्रहोभवत्यलमश्नुतेबलपुष्टिमासर्वान्सर्वमायुरिति भविष्यपुराणेविशेषः भोजनात्किंचिदन्नाद्यं धर्मराजायवैबलिं दत्वाथ
चित्रगुप्तायप्रेतेभ्यश्चेदमुच्चरेत् प्रेतबलिमंत्रोप्यग्रेवक्ष्यते बल्युद्धरणंकार्यमित्युक्तंरामार्चनचंद्रिकायां भोजनादौबलिर्मुक्तः स
हिरण्यस्यभोजनं अनुकृत्यतुयो फले प्राणायामाष्टकंचरेत् स्मृत्यंतरे चित्राहुतीरनुस्मृत्ययोभुंक्तेग्रासपंचकं अपंसकेवलंभुंक्ते ज्ञा
नतोऽज्ञानतोपिवेति शौनकः स्वाहांताः प्रणवाद्याश्चनाम्नामंत्राश्चवायवइति आश्वमेधिके यथारसंनजानातिजिह्वाप्राणाहुतौनृपत
थासमाहितः कुर्यात्प्राणाहुतिमतंद्रितइति अपरार्केत्रिः मधुपर्केचसोमेच अप्सुप्राणाहुतीषुच नोच्छिष्टस्यभवेद्दोषस्तत्रे
प्रवचनंयथा विष्णुपुराणे प्राकृद्रवंपुरुषोऽश्नीयान्मध्येचकठिनाशनः अंतेपुनर्द्रवाशीतुबल्यारोग्येनमुंचति जठरंपूरयेदर्धमन्नैर्भा
गंजलस्यच वायोः संचरणार्थायचतुर्थमवशेषयेदिति आपस्तंबः अष्टौग्रासामुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तुगृहस्थ

